ॐ

समीक्षार्थम्

ईशस्तुतिः

रचयिता—

हंसराजः नागरः

एम० ए०।

सर्वाधिकाराः सुरक्षिताः ।

प्रथमम् संस्करणम्—26-1-1988

प्राप्तिस्थानम्
हंसराजः नागरः
ग्रामः — तिगांवः 121101
उपमण्डलम् — बल्लभगढ़म्
मण्डलम् — फरीदाबादम् ।
(हरियाणा)

मूल्यम् रुप्यकत्रयम् 3-00

मुद्रक : बादशाह प्रिंटिंग प्रैस
सीही गेट, बल्लबगढ़ ।

ॐ

ईशस्तुतिः

रचियता—

हंसराजः नागरः

एम० ए०।

दृश्यते यो न चक्षुर्भ्यां, वाचाऽपि न च कथ्यते ।
सर्वेषां दीनबन्धुः स प्रकाशयतु मे धियम् ।।1।।

तं जगत्पितरं देवं, मंगलकृद्विनायकम् ।
दीनबन्धुं परं ब्रह्म, मुर्हुः मुर्हुः नमाम्यहम् ।।2।।

सर्वज्ञं सच्चिदानन्दं, सकललोकनायकम् ।
नमामि बहुवारं तं, सर्वेषां विघ्ननाशकम् ।।3।।

नमस्करोमि सर्वज्ञं, नमस्करोमि सर्वगम् ।
नमस्करोमि पापघ्नं नमस्करोमि मङ्गलम् ।।4।।

नमाम्यहं जगन्नाथं, नमामि जनपालकम् ।
नमाम्यहं परं ब्रह्म, नमाम्यहं सदात्मकम् ।।5।।

वर्तमानोऽपि सर्वत्र, दृश्यते न कदाचन ।
तेजसैव तदीयेन, संसारोऽयं प्रकाशितः ।।6।।

सोऽजन्मा सच्चिदानन्दः प्रभुस्त्रिलोकनायकः ।
अजरोऽमरसर्वज्ञः सर्वलोकैकपालकः ।।7।।

पूर्वकालेऽप्यसावासीद् बर्तमानेऽपि वर्तते ।
भविता च भविष्येऽपि, जगदात्मा सनातनः ।।8।।

यच्छ्रुत्वा परमं श्रेष्ठं पदं तव लभेमहि ।
भोः प्रभो कृपया तन्मे ज्ञानं प्रयच्छ निश्चितम् ।।9।।

सर्वाणि मे सुखानीह प्रयच्छ त्वं दयानिधे ।
भूत्वा प्रसन्नचित्तस्त्वां येन स्मराणि सर्वदा ।।10।।

लोकेऽस्मिन् बहुरुपाणि, तावकानि जगत्पते ।
यो निध्यायति यद्रुपं तदेव तेन दृश्यते ।।11।।

प्रयच्छ मे सतीं बुद्धिं दीनबन्धो प्रजापते ।
कुवन्नेवेह कर्माणि, जीवान्यहं शतं समाः ।।12।।

समुत्थाय खगाः सर्वे प्रातर्गायन्ति तावकम् ।
मिलित्वा सर्ववृक्षेषु गुणग्रामं शुभं प्रभो ।।13।।

त्रैलोक्यनाथ सर्वस्य जगतः प्रतिपालक ।
भोजनादीनि वस्तूनि सर्वेभ्यो देहि केशव । 14।।

दयानिधे प्रसादेन जन्मजन्मसु मे हृदि ।
श्रद्धाभावेन ते नाम्नः सुस्मरणं सुशोभताम् ।।15।।

तव कृपां विना देव, समर्थः कोऽपि नास्त्यहो ।
तरितुं घोरविस्तीर्णं संसारदुःखसागरम् ।।16।।

दीनबन्धो विना शक्तिं तावकीं स्पन्दतुं क्वचित् ।
पत्रमपि न शक्नोति, महान्धकारसंसृतौ ।।17।।

धर्मार्थकाममोक्षाणां प्रदाता स जगत्पिता ।
लोकेऽस्मिन्नास्ति वै तस्य समानः कोऽपि वाऽधिकः ।।18।

केवलं योगिनस्तस्य रहस्यं गुप्तचेष्टितम् ।
वशीकृतेन जानन्ति योगाभ्यासेन चेतसा ।।19।।

ज्ञेयोऽसि त्वं त्रिलोकेषु सृष्टं सर्वं त्वया प्रभो ।
त्वामादिपुरुषं देव कथयन्ति मनीषिणः ।।20।।

नश्वरेऽपारसंसारे प्रभोः सत्ता सुशोभते ।
न तस्याज्ञां विना कार्यं किमपि खलु सम्भवम् ।।21।।

स सूक्ष्मेष्वपि सूक्ष्मोऽस्ति महत्सु च महत्तमः ।
सर्वज्ञेषु स सर्वज्ञः योगिभिर्ध्यायते सदा ।।22।।

पवित्रमनसा योऽपि ध्यायन्नित्यं दयानिधिम् ।
सुखान्यपि स सर्वाणि लभते भुवि निश्चितम् ।।23।।

पाहि मां नाथ पापेभ्यस्त्राहि मामधिनायक ।
संरक्ष मां च दुःखेभ्यः पाहि मामीश सर्वतः ।।24।।

दीनानां नाथ दीव्यन्ति कृपया तव तारकाः ।
आकाशमण्डले सूर्यश्चन्द्रमाश्चैव नित्यशः ।।25।।

दूरीकरोतु पापानि दीनबन्धुर्जगत्पतिः ।
ददातु शुभकर्माणि मह्यं सदा पुनः पुनः ।।26।।

वसतु हृदि मे श्रीशो नारायणो जगत्पतिः ।
पुनातु खलु वाचं मे नाशयतु सदाऽशुभम् ।।27।।

हृदिस्थो भवतु ब्रह्म प्रभुर्गुणनिधिः सदा ।
नैकं वदन्ति यं विप्राः परं य इह केवलः ।।28।।

करोतु नो मनः पूतं पूजनीयो दयानिधिः ।
जीवानां येन सर्वेषां प्रकुर्याम हितं सदा । 29।।

करोति यो जनः कार्यं देवस्य स्मरणं विना ।
सदा नश्यति तत्कार्यं स्मरणीयो हरिः सदा ।।30।।

कल्याणकारिणं देव सुबुदिदायकं सदा ।
सर्वपापहरं देवं भूयो भूयो नमाम्यहम् ।।31।।

निर्विकारं सदाधारं स्रष्टारं हि जगत्पतिम् ।
वारम्वारं करौ बद्ध्वा सदभावेन नमाम्यहम् ।।32।।

दीनानां दीनबन्धो त्वं कृपया हि जगत्पते ।
सर्वेभ्य इह जीवेभ्यः खादितुं देहि भोजनम् ।।33।।

पापरहितसद्वृत्ति बुद्धिं मह्यं जगत्पते ।
प्रदेहि दीनबन्धो वै हरतान्मम पातकम् ।।34।।

वित्तं यो वित्तहीनानां चक्षुर्यो वीतचक्षुषाम् ।
बान्धवो यश्च दीनानां तमीश्वरं नमाम्यहम् ।।35।।

सर्वभूतान्तरात्मानं दीनबन्धुं प्रभुं करौ ।
बद्ध्वा नमामि यो वै न लोकदुःखेन लिप्यते ।।36।।

नित्यस्त्वमस्यनित्येषु चेतनोऽचेतनेषु च ।
सर्वत्र तव वासोऽस्ति जगत्यां करुणानिधे ।।37।।

दूरात् त्वमसि दूरस्थो नेदीयान् निकटादपि ।
सूक्ष्मात् सूक्ष्मातरोऽसि त्वं महतोऽपि महाँस्तथा ।।38।।

नद्यो यथा समुद्रं हि सम्मिलन्ति समन्ततः ।
जीवास्तथैव सर्वेऽपि यान्ति त्वामेव निश्चितम् ।।39।।

त्वमग्निस्त्वमादित्यस्त्वं चन्द्रमा जगत्पते ।
त्वं ब्रह्मा खलु विष्णुस्त्वं त्वमीश सर्वदेवताः ।।40।।

त्वं ज्ञेयोऽसि बन्धुर्मे त्वं सर्वत्र विराजसे ।
त्वं सर्वस्य प्रदाता च सत्ता तव कणे कणे ।।41।।

जगदीश सदाधार परं पितर्दयानिधे ।
गच्छामि शरणं त्वां वै कल्याणं मे कुरु प्रभो ।।42।।

त्वं हि ज्ञेयोऽसि वेदेषु त्वं हि सदैव चाव्ययः ।
त्वं हि ज्ञेयोऽसि वेदान्तैस्त्वं निर्लेपोऽसि सर्वथा ।।43।।

लोकेऽसि दीनबन्धो त्वं सर्वेषां मूलकारणम् ।
सर्वेषामपि धर्माणां त्वं हि ज्ञेयोऽसि केवलम् ।।44।।

सर्वे भवन्तु भक्ताश्च सर्वे भवन्तु धार्मिकाः ।
सर्वे भबन्तु नीरोगाः सर्वे भवन्तु पण्डिताः ।।45।।

इति हंसराजनागरप्रणीता ईशस्तुतिः
।। ओ३म् ।।